# ''ध्रुवस्तुतिः''

(भागवतमहापुराणं 4.9.6-17)

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां,
संजीवयत्यखिलशक्तिधरः स्वधाम्ना।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्,
प्राणान्नमो भगवते पुरुषाय तुभ्यम्।।1।।

एकस्त्वमेव भगवन्निदमात्मशक्त्या,
मायाख्ययोरुगुणया महदाद्यशेषम्।
सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु,
नानेव दारुषु विभावसुवद्विभासि।।2।।

त्वद्दत्तया वयुनेदमचष्ट विश्वं,
सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः।
तस्यापवर्ग्यशरणं तव पादमूलं,
विस्मर्यते कृतविदा कथमार्तबन्धो।।3।।

नूनं विमुष्टमतयस्तव मायया ते,
ये त्वां भवाप्ययविमोक्षणमन्यहेतोः।
अर्चन्ति कल्पकतरुं कुणपोपभोग्य-,
मिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम्।।4।।

या निर्वृतिस्तनुभृतां तव पादपद्म,
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्,
किं त्वन्तकासिलुलितात्पततां विमानात्।।5।।

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो,
भूयादनन्त महताममलाशयानाम्।
येनांजसोल्बणमुरुव्यसनं भवाब्धिं,
नेष्ये भवद्गुणकथामृतपानमत्तः।।6।।

ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं,
ये चान्वदः सुतसुहृद्गृहवित्तदाराः।
ये त्वब्जनाभ भवदीयपदारविन्द-,
सौगन्ध्यलुब्धहृदयेषु कृतप्रसंगाः।।7।।

तिर्यङ्नगद्विजसरीसृपदेवदैत्य-,
मर्त्यादिभिः परिचितं सदसद्विशेषं।
रूपं स्थविष्ठमज ते महदाद्यनेकं,
नातः परं परम वेद्मि न यत्र वादः।।8।।

कल्पान्त एतदखिलं जठरेण गृह्णन्,
शेते पुमान् स्वदृगनन्तसखस्तदंके।
यन्नाभिसिन्धुरुहकांचनलोकपद्म-,
गर्भे द्युमान्भगवते प्रणतोऽस्मि तस्मै।।9।।

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा,
कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः।
यद्बुद्ध्यवस्थितिमखण्डितया स्वदृष्ट्या,
द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से।।10।।

यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति,
विद्यादयो विविधशक्तय आनुपूर्व्यात्।
तद्ब्रह्म विश्वभवमेकमनन्तमाद्य-,
मानन्दमात्रमविकारमहं प्रपद्ये।।11।।

सत्याशिषो हि भगवंस्तव पादपद्म-,
माशीस्तथानुभजतः पुरुषार्थमूर्तेः।
अप्येवमर्य भगवान् परिपाति दीनान्,
वाश्रेव वत्सकमनुग्रहकातरोऽस्मान्।।12।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM